नासाग्रे वा तथास्ये वा कन्धरे हृदये तथा ।
नाभौ वा शाश्वतस्थाने श्रद्धाविद्धेन चेतसा ॥
बहिर्य्यागोपचारेण देवं देवीञ्च पूजयेत् ।
अथवा पूजयेन्नित्यं लिङ्गे वा कृतकेऽपि वा ॥
वह्नौ वा स्थण्डिले वाथ भक्त्या वित्तानुसारतः ॥
अथवान्तर्बहिश्चैव पूजयेत् परमेश्वरम् ।
अन्तर्य्यागरतः पूजां बहिः कुर्व्वीत वा न वा ॥”)
अस्योत्पत्तिर्यथा,—

ऋषय ऊचुः ।

“कथं यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
त्रेतात्वमगमन् पुत्त्रा वराहस्य कथं त्रयः ।
तन्नोऽद्य श्रोष्यमाणानां कथयस्व महामते ! ॥

श्रीमार्कण्डेय उवाच ।

शृणुध्वं द्विजशार्दूला यत् पृष्टोऽहं महाद्भुतम् ।
यज्ञेषु देवास्तिष्ठन्ति यज्ञे सर्व्वं प्रतिष्ठितम् ॥
यज्ञेन ध्रियते पृथ्वी यज्ञस्तारयति प्रजाः ।
अन्नेन भूता जीवन्ति पर्जन्यादन्नसम्भवः ॥
पर्जन्यो जायते यज्ञात् सर्व्वं यज्ञमयं ततः ।
स यज्ञोऽभूद्वराहस्य कायात् शम्भुविदारितात् ॥
यथाहं कथये तद्वः शृणुध्वमवहिता द्विजाः ।
विदारिते वराहस्य काये भर्गेण तत्क्षणात् ॥
ब्रह्मविष्णुशिवा देवाः सर्व्वैश्च प्रमथैः सह ।
निन्युर्जलात् समुद्धृत्य तच्छरीरं नभः प्रति ॥
तद्विभेजुः शरीरन्ते विष्णोश्चक्रेण खण्डशः ।
तस्याङ्गसन्धयो यज्ञा जातास्ते वै पृथक् पृथक् ॥
यस्माद्यस्माच्च ये यज्ञास्तत् शृणुध्वं महर्षयः ।
भ्रूनासासन्धिना जातो ज्योतिष्टोमो महाध्वरः ॥
हनुश्रवणसन्ध्योस्तु वह्निष्टोमो व्यजायत ।
चक्षुर्भ्रुवोः सन्धिना तु व्रात्यष्टोमो व्यजायत ॥
राजः पौनर्भवष्टोमस्तस्य पोत्त्रोष्ठसन्धिना ।
वृद्धष्टोमबृहष्टोमौ जिह्वामूलादजायत ॥
अतिरात्रं सवैराजमधोजिह्वान्तरादभूत् ॥
अध्यापनं ब्रह्मयज्ञः पितृयज्ञस्तु तर्पणम् ।
होमो दैवो बलिर्भौतो नृयज्ञोऽतिथिपूजनम् ॥
स्नानं तर्पणपर्य्यन्तं नित्ययज्ञाश्च सर्व्वशः ।
कण्ठसन्धेः समुत्पन्ना जिह्वातो विधयस्तथा ॥ ॥
वाजिमेधो महामेधो नरमेधस्तथैव च ।
प्राणिहिंसाकरा येऽन्ये ते जाताः पादसन्धितः ॥
राजसूयोऽथ कारीषो वाजपेयस्तथैव च ॥
पृष्ठसन्धौ समुत्पन्ना ग्रहयज्ञास्तथैव च ॥
प्रतिष्ठोत्सर्गयज्ञाश्च दानश्राद्धादयस्तथा ।
हृत्सन्धितः समुत्पन्नाः सावित्रीयज्ञ एव च ॥
सर्व्वेषां साधका यज्ञाः प्रायश्चित्तकराश्च ये ।
ते मेढ्रसन्धितो जाता यज्ञास्तस्य महात्मनः ॥
रक्षःसत्रं सर्पसत्रं सर्व्वश्चैवाभिचारिकम् ।
गोमेधो वृक्षजायश्च खुरेभ्यो ह्यभवन्निमे ॥
मायेष्टिः परमेष्टिश्च गोष्पतिर्भोगसम्भवः ।
लाङ्गूलसन्धौ संजाता अग्निष्टोमस्तथैव च ॥
नैमित्तिकाश्च ये यज्ञाः संक्रान्त्यादौ प्रकी-
र्त्तिताः ।
लाङ्गूलसन्धौ ते जातास्तथा द्वादशवार्षिकम् ॥
तीर्थप्रयोगसामौजयजुःसङ्घर्षणस्तथा ।
आर्कमाथर्व्वणञ्चैव नाभिसन्धेः समुद्गताः ॥
ऋक्षोत्कर्षः श्येनयज्ञः पञ्चमार्गोऽतियोजनः ।
लिङ्गसंस्थानहेरम्बयज्ञा जाताश्च जानुनि ॥
एवमष्टाधिकं जातं सहस्रं द्विजसत्तमाः ॥
यज्ञानां सततं लोका यैर्भाव्यन्तेऽधुनापि च ।
स्रुगस्य पोत्रात् संजाता नासिकायाः स्रुवो-
ऽभवत् ॥
अन्ये स्रुक्स्रुवभेदा ये ते जाताः पोत्रनासयोः ।
ग्रीवाभागेन तस्याभूत् प्राग्वंशो मुनिसत्तमाः ॥
इष्टापूर्त्तं यजुर्धर्म्मो जाताः श्रवणरन्ध्रतः ।
दंष्ट्राभ्यो ह्यभवन् यूपाः कुशा रोमाणि चाभ-
वन् ॥
उद्गाता च तथाध्वर्युर्होता समिध एव च ।
अग्रदक्षिणवामाङ्गपश्चात्पादेषु सङ्गताः ॥
पुरोडाशाः सचरवो जाता मस्तिष्कसञ्चयात् ।
कर्णनेत्रयुगाज्जाता यज्ञकेतुस्तथा खुरात् ॥
मध्यभागोऽभवद्वेदी मेढ्रात् कुण्डमजायत ।
रेतोधारास्तथैवाज्यं स्वराम्नायाः समुद्गताः ॥
यज्ञालयः पृष्ठभागात् हृत्पद्मात् यज्ञ एव च ।
तदात्मा यज्ञपुरुषो मुञ्जाः कक्षात् समुद्गताः ॥
एवं यावन्ति यज्ञानां भाण्डानि च हवींषि च ।
तानि यज्ञवराहस्य शरीरादेव चाभवन् ॥
एवं यज्ञवराहस्य शरीरं यज्ञतामगात् ।
यद्रूपेण सकलमाप्यायितुमिदं जगत् ॥
एवं विधाय यज्ञन्तु ब्रह्मविष्णुमहेश्वराः ।
सुवृत्तं कनकं घोरमासेदुर्यज्ञतत्पराः ॥
ततस्तेषां शरीराणि पिण्डीकृत्य पृथक् पृथक् ।
त्रिदेवाश्चिशरीराणि अधमन्मुखवायुभिः ॥
सुवृत्तस्य शरीरन्तु ब्रह्ममन्मुखवायुना ।
स्वयमेव जगत्स्रष्टा दक्षिणाग्निस्ततोऽभवत् ॥
कनकस्य शरीरन्तु ध्मापयामास केशवः ।
ततोऽभूद्गार्हपत्याग्निः पञ्चवैतानभोजनः ॥
घोरस्य तु वपुः शम्भुर्ध्मापयामास वै स्वयम् ।
तत आहवनीयोऽग्निस्तत्क्षणात् समजायत ॥
एतैस्त्रिभिर्जगत् व्याप्तं त्रिस्थलं सकलं जगत् ।
एतत् यत्र त्रयं नित्यं तिष्ठति द्विजसत्तमाः ।
समस्ता देवतास्तत्र वसन्त्यनुचरैः सह ॥
एतद्ब्रह्मपदं नित्यमेतदेव त्रयात्मकम् ।
एतत् त्रयीविधिस्थानमेतत् पुण्यकरं परम् ॥
यस्मिन् जनपदे चैते हूयन्ते अग्नयस्त्रयः ।
तस्मिन् जनपदे नित्यं चतुर्व्वर्गो विवर्द्धते ॥
एतद्वः कथितं सर्व्वं यत् पृष्टं द्विजसत्तमैः ।
यथा यज्ञवराहस्य देहो यज्ञत्वमाप्तवान् ।
तथा च तस्य पुत्त्राणां देहास्त्रेतात्वमागमन् ॥”

इति कालिकापुराणे ३० अध्यायः ॥*॥

ब्रह्मण आदियज्ञो यथा,—

पुलस्त्य उवाच ।

“पूर्व्वमेव मया ख्यातं यदा स्वायम्भुवो मनुः ।
जातः परमधर्म्मात्मा शतरूपापतिः स्वयम् ॥
स्रष्टा प्रजापतिः पूर्व्वं सृष्टिकर्म्मण्ययोजयत् ।
वत्स ! त्वमेव संकल्प्य स्वल्पां सृष्टिं कुरु ह्यथ ॥
स्वयं तु पुष्करं गत्वा कृत्वा यज्ञन्तु विस्तरम् ।
ब्रह्मोद्गाता होताध्वर्य्युश्चत्वारो यज्ञवाहकाः ।
एकैकस्य त्रयश्चान्ये परिवाराः स्वयं कृताः ॥
एते वै षोड़श प्रोक्ता ऋत्विजो वेदचिन्तकाः ।
शतानि त्रीणि षड्भिश्च यज्ञाः सृष्टाः स्वय-
म्भुवा ॥

भीष्म उवाच ।

यज्ञस्य ब्रह्मणो विप्र ! समाप्तिं वद साम्प्रतम् ॥

पुलस्त्य उवाच ।

मन्वन्तरे व्यतीते तु यज्ञस्यावभृथोऽभवत् ।
दक्षिणा ब्रह्मणा दत्ता प्राची होतुस्तु दक्षिणा ॥
अध्वर्य्यवे प्रतीची तु उद्गातुश्चोत्तरा तथा ।
त्रैलोक्यं सकलं ब्रह्मा ददौ तेषान्तु दक्षि-
णाम् ॥
धेनूनाञ्च शतं साष्टं दातव्यं यज्ञसिद्धये ।
अध्वर्य्यूणां सहस्राणि स्वेच्छया दानमिष्यते ॥”

इति पाद्मे सृष्टिखण्डे ३१ अध्यायः ॥*॥

ब्राह्मणादीनां स्वधर्म्मयज्ञा यथा,—

“आरम्भयज्ञाः क्षत्त्राः स्युर्हविर्यज्ञा विशः
स्मृताः ।
परिचारयज्ञाः शूद्रास्तु जपयज्ञास्तु ब्राह्मणाः ॥”

इति मात्स्ये ११८ अध्यायः ॥*॥

हिंसायज्ञस्य अधर्म्मजनकत्वं यथा,—

“तथा विश्वभुगिन्द्रस्तु यज्ञं प्रावर्त्तयत् प्रभुः ।
दैवतैः सह संहृत्य सर्व्वसाधनसंभृतम् ॥
तस्याश्वमेधे वितते समाजग्मुर्महर्षयः ।
महर्षयश्च तान् दृष्ट्वा दीनान् पशुगणांस्तदा ॥
विश्वं भुजन्तं त्वपृच्छन् कोऽयं यज्ञविधिस्तव ।
अधर्म्मो बलवानेष हिंसाधर्म्मेप्सया तव ॥
न नः पशुवधस्त्विष्टस्तव यज्ञेश्वरोत्तम ! ।
अधर्म्मो धर्म्मघाताय प्रारब्धः पशुभिस्त्वया ॥
नायं धर्म्मो ह्यधर्म्मोऽयं न हिंसा धर्म्म उच्यते ।
आगमेन भवान् धर्म्मं प्रकरोतु यदीच्छति ॥
विधिदृष्टेन यज्ञेन धर्म्मेणाव्ययसेतुना ॥
एवं विश्वभुगिन्द्रस्तु ऋषिभिस्तत्त्वदर्शिभिः ।
उक्तो न प्रतिजग्राह मानमोहसमन्वितः ॥
तेषां विवादः सुमहान् जज्ञे इन्द्रमहर्षि-
णाम् ।
जङ्गमैः स्थावरैः केन यष्टव्यमिति चोच्यते ॥
ते तु खिन्ना विवादेन तत्त्वयुक्ता महर्षयः ।
सन्धाय वाक्यमिन्द्रेण पप्रच्छुः खचरं वसुम् ॥

ऋषय ऊचुः ।

महाप्राज्ञ कथं दृष्टस्त्वया यज्ञविधिर्नृप ! ।
उत्तानपादे ! प्रब्रूहि संशयं नो नुद प्रभो ! ॥

सूत उवाच ।

श्रुत्वा वाक्यं वसुस्तेषामविचार्य्य बलाबलम् ।
वेदशास्त्रमनुस्मृत्य यज्ञतत्त्वमुवाच ह ॥
यष्टव्यं पशुभिर्मेध्यैरथ मूलफलैरपि ।
हिंसा स्वभावो यज्ञस्य इति मे दर्शनागमः ॥
एवं कृतोत्तरास्ते तु युक्तात्मानं ततो धिया ।
अवश्यं भाविनं दृष्ट्वा तमधो ह्यशपंस्तदा ॥
इत्युक्तमात्रो नृपतिः प्रविवेश रसातलम् ।
धर्म्माणां संशयच्छेत्ता राजा वसुरधो गतः ॥